Shabarapragadavarnanam Giti

शबरप्रगादवर्णनगीतिः

Document Information

Text title : Shabarapragadavarnanam Giti

File name : shabarapragAdavarNanagItiH.itx

Category : shiva, vAsudevAnanda-sarasvatI

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

sanskritdocuments.org

शबरप्रगादवर्णनगीतिः

गीतिः
विभूतिभर्त्रेऽन्वहमर्पयन् चिताविभूतिमाप्त्वैकदिने स नोचिताम् ।
गात्रार्धभस्म प्रददौ धनञ्जयच्छात्रस्तदाऽभूद्वरदः पुरञ्जयः ॥ १॥

शङ्करभजनं संसृतिभञ्जनं किङ्कररञ्जनं मायातमोऽञ्जनम् ॥ ध्रु ।
भाविकजीवनं पावनपावनं आर्तपरावनं शान्तिमहावनम् ॥ १॥

मत्वा धनञ्जयभूपानुशासनं शबरोऽप्यकरोल्लिंगसमर्चनम् ॥ २॥

नवचितिभूतिं शबरोऽनुदिनं भूतिवरायाददनुसवनम् ॥ ३॥

एकदिने स क्वाप्यलभन्न भस्म स ऐच्छच्छबरो निधनम् ॥ ४॥

आह तदा स्त्रीः कुरु सदनेन सहदयितार्धस्ववपुर्दहनम् ॥ ५॥

स तथा दग्ध्वा भसितेन तेन शङ्करपूजनमकरोद्दीनः ॥ ६॥

आह्वयदङ्गनामर्चनावसान ईशस्तुष्टोऽदर्शयदङ्गनाम् ॥ ७॥

प्रादुर्भूत्वा स्वयमीशानस्ताभ्यां प्रददौ स निजस्थानम् ॥ ८॥

यस्य न मानं तव महिमानं तमजानुदिनं स्मरामि नूनम् ॥ ९॥

श्रद्धाभक्तिर्मे न न तेऽर्चनं जाने क्षमस्वापराधमीशान ॥ १०॥

इति वासुदेवानन्दसरस्वतीयतिकृतविनतिं शृण्वीशान ॥ ११॥

इति श्रीवासुदेवानन्दसरस्वतीविरचिता शबरप्रगादवर्णनगीतिः समाप्ता ।

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*